३ स्तर्व्वागमरताः–क ; स अक्षर केरमेट भएको–ख ।
४ स केरमेट भएको–ख ।
५ निःस्त्रिंशाचारसंयुक्ताः–क ।
६ दूतीयुक्ता–ग ।
७ ध अक्षर केरमेट भएको–क ; ..लविंसाधकैर्युक्तः–ग ।
८ शूक्ष्मा–क,ख ।
९ मदां–क ।
१० पुष्पैःर्भक्ष्य–क ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मांसैश्च पानकैर्दिव्यैः पशुभिश्चोत्तमाधमैः ।
मान्दारकुसुमैश्चैव नानाधूपैः सुगन्धिभिः[1] ॥ ७५ ॥
एतद्यागपदं चिन्त्यं शोभनं कुलगोचरे ।
दक्षिणाभिमुखो भूत्वा खटिकाकरसंयुतः ॥ ७६ ॥
तत्रालिखेत् परां देवीं शुष्कां शुष्काननां शिवाम् ।
द्विभुजामेकवक्त्रां च मांसशोणितवर्जिताम् ॥ ७७ ॥
स्नाय्वस्थिकृष्णवपुषीं नरान्त्रादिप्रियां सदा[2] ।
रुद्रमुण्डासनारूढां मुण्डद्वयपदार्पिताम् ॥ ७८ ॥
वामके वैष्णवं मुण्डं सव्ये मुण्डं विरिञ्चिजम् ।
प्रत्यालीढे च चरणे[3] स्थिता साद्या प्रपूरणी ॥ ७९ ॥
अघोरा घोरदंष्ट्रा तु महाफेत्कारनादिनी ।
ऊर्ध्वकेशी त्रिनेत्रा च महापात्रधरी शिवा ॥ ८० ॥
शुष्कस्तना कृशोदरी शिशुकर्णावलम्बिनी ।
महाह्याभरणा रौद्रा मुण्डमालाविभूषिता ॥ ८१ ॥
एवं रूपधरां लिख्य मातृकां तत्र पूजयेत् ।
पश्चात् सम्पूजयेत् तां तु यथाविभवविस्तरैः ॥ ८२ ॥

क्रमहरू कौलसंस्था हुन् भने कौलचाहिँ कुलाकुलरूप द्वैताद्वैतभाव हो। अब म कुलाकुलरूप कौलको उपाधिक्रमसम्बन्धी उपदेश गर्छु त्यसलाई एकाग्रचित्त भएर सुन।

सबैभन्दा माझमा रहेको श्रीपीठ, कामरूपपीठ, काश्मीरपीठ, डाहलपीठ, कौलगिरिपीठ, गौडपीठ यी पीठस्थानहरूमा, श्मशानमा, मातृकामण्डलमा, उबडखाबड नभएको ऐनाजस्तै सम्म परेको, भुस, रौँ, हाड आदि नभएको, महोदकले लिपिएको, कुङ्कुमजलले युक्त, फूलका थुङ्गाहरूले सजाइएको, विभिन्न किसिमका धूपहरूको सुगन्धले युक्त भएको स्थानमा अत्यन्त आनन्दित भावले युक्त भएर गुरु, योगिनी एवं अत्यन्त धीर स्वभाव भएका, निर्विकल्पभावमा आरूढ भएका, अद्वैताचारमा पारङ्गत भएका, बलियुक्त आचारमा लागेका, प्रपञ्चले रहित भएका कुलसाधकहरू तथा त्यस्ता कुलसाधकहरूले युक्त, दूतीले सहित भएका अत्यन्त बुद्धिमान्, कुलसाधनालाई राम्ररी जान्ने, क्रमविज्ञानमा पारङ्गत भएका आचार्यले स्थूल एवं सूक्ष्मस्वरूप धारण गर्ने भएकी पराशक्ति जो सूक्ष्म रूप धारण गर्दा कुलस्वरूपमा रहेकी छिन् भने स्थूल रूप धारण गर्दा बाह्य जगत्का

---

१ सुगन्धि पाठ टुटेको–क ।
२ दा केरमेट भएको–ख ; सपछाडिको स्थान खाली रहेको–ग ।
३ कर केरमेट भएको–ख ; ..रणे–ग ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रूपमा रहेकी छिन् त्यस्ती विश्वरूप भएकी अनन्त ऐश्वर्यले युक्त विश्वलाई ग्रास गर्ने अर्थात् आफूमा लीन गर्ने संहारलीलामा तत्परताका साथ लागेकी भगवतीको पूजा गर्नू। कालाग्निकुण्डबाट उदाएकी, करोडौँ बिजुलीको झैँ आभा भएकी, त्रिधाम अर्थात् सोम, सूर्य र अग्निरूप त्रिधामको माझमा रहेकी, आधारधाम (मूलाधार चक्र) मा रहेकी, षडङ्गयोगबाट मुक्त, सधैँ आफ्नो योगको पालना गर्ने, तमस् अर्थात् अन्धकारस्वरूप भएकी, केवल वा अद्वितीय स्वरूप भएकी भैरवीलाई ध्यानपूर्वक चिन्तन गर्नू तथा मानसोपचारले एवं अनेक प्रकारका फलफूल, मद्य, मासु, दिव्य पेय पदार्थहरू, पशुबलि, मान्दार फूलहरू, विभिन्न किसिमका सुगन्धी धूपहरूले पूजा गर्नू। माथि वर्णन गरिएको यागपद (यागधाम) को चिन्तन वा निर्धारण कुलनक्षत्रमा गर्नू र दुवै कानको बाहिरी भागमा हात राखेर क्षमायाचनाको भावले युक्त साधकले दक्षिणाभिमुख भएर सो यागधाममा शुष्क मुख भएकी, एक मुख तथा दुई हातले युक्त शरीर भएकी, मासु र रगत नभएको शुष्क कङ्कालस्वरूप भएकी, नसा र हाडमात्र भएको कालो वर्णकी, मान्छेको आन्द्रालाई प्रिय मानेर आफ्नो गलामा बेरेकी, रुद्रको शिरमा बसेकी तथा बायाँ पाउ विष्णुको शिरमा तथा दायाँ पाउ ब्रह्माको शिरमा राखेकी, देब्रे खुट्टा अगाडि र दायाँ खुट्टा पछाडि हुने गरी प्रत्यालीढ आसनमा रहेकी, समस्त कामना पूर्ति गर्ने, आद्याशक्ति, अघोर स्वरूप भएकी, तीखा डरलाग्दा दाँत भएकी, डरलाग्दो आवाज निकाल्ने, माथि फर्केको कपाल भएकी, तीनवटा आँखा भएकी, महापात्र (कपाल) धारण गर्ने, कल्याणमूर्ति, शुष्क स्तन भएकी, पातलो कम्मर भएकी, विशाल सर्पलाई घाँटीको गहना बनाएकी, रौद्र स्वरूपकी, मुण्डमालाले विभूषित भएकी यस्ती मातृदेवीको चित्र बनाएर सो चित्रमा विभिन्न किसिमका पूजासामग्रीहरूले तिनको पूजा गर्नू ॥ ६२–८२ ॥

चक्रं तु कारयेत् तत्र पानगोष्ठ्यां[1] परस्परम् ।
ततो वर्णांश्च संयोज्य योगेश्यङ्गेषु भैरव ॥ ८३ ॥
आचार्येणातिसुधिना यथा वच्मि तथा श्रृणु ।
संहारमादितः कृत्वा विन्यसेद् वर्णमातृकाम् ॥ ८४ ॥
वीरेशाख्यं शिखायां च मूर्द्धान्ते सुरसुन्दरि ।
नीरं च पार्थिवं तुर्यं चित्रभानुं[2] शिरोरुहे ॥ ८५ ॥
षोडशान्तं च शिरसि जादिढान्तास्थिभूषणे ।
द्विजिह्वमूर्ध्वनयने प्रज्ञा वामे उ मध्यके ॥ ८६ ॥

---

१ पानगोष्ठ्या–ख,ग ।
२ चित्रभानुंमध्ये त्र र नु वर्ण केरमेट भएको–क ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आत्मतत्त्वं नासिकायां त्रिपत्रं[1] वक्त्रमण्डले ।
पूर्णा[2] तृतीयं द्विरदं[3] दंष्ट्रयोरुभयोरपि ॥ ८७ ॥
भीषणं चावमार्गे तु अश्वार्णं[4] वामकर्णके ।
तथात्र भूषणे योज्ये चन्द्रार्ककृतकुण्डले ॥ ८८ ॥
दक्षिणे श्रवणे[5] चापं कृतान्तं भूषणं न्यसेत् ।
चापं शिरयुतं[6] कण्ठे योजनीयं कपालधृक् ॥ ८९ ॥
क्रूरान्तं दक्षिणे स्कन्धे वर्णान्तं वामतो न्यसेत् ।
स्यन्दनान्तं[7] नरान्त्रेषु[8] कालान्तं भुजगे न्यसेत् ॥ ९० ॥
मर्माद्यं च स्तने वामे समीरान्तं तु दक्षिणे ।
पक्षेशं दक्षिणे बाहौ वामे न्यस्य द्विपं हर ॥ ९१ ॥
ऊर्ध्वरावं वामकरे तस्याद्यं[9] दक्षिणे करे ।
पात्रे चैकादशान्तस्थं शत्तचाद्यं हृदये न्यसेत् ॥ ९२ ॥
वर्गान्तं सानुनासं च वामदक्षिणपार्श्वयोः ।
पक्षीशस्याद्यगं जीवे नाभिस्थं दारिताननम्[10] ॥ ९३ ॥
नितम्बे[11] चामृतार्णं तु वाग्भवान्तं च योनिगम् ।
तुर्यान्तं गुह्यसंस्थाने योज्यं भस्मविलेपन[12] ॥ ९४ ॥
नपुंसकाद्यौ द्वौ वर्णौ ऊरुसव्यापसव्यके ।
सृष्टिस्थं दक्षिणं जानु[13] तदन्तं वामतो न्यसेत् ॥ ९५ ॥
नपुंसकान्तौ द्वौ वर्णौ पादौ दक्षिणवामगौ ।
प्रणवं विष्णुमुण्डे तु वामपादासनं विदुः ॥ ९६ ॥
चन्द्राश्चतुर्दशं देव ब्रह्ममुण्डे नियोजयेत् ।
द्विजिह्वान्तं रुद्रमुण्डे काल्या आसनमुत्तमम् ॥ ९७ ॥

---

१ त्रिपत्रं]संशोधित पाठ ; त्रिपञ्च–क,ग ; त्रिपंच–ख ।
२ सामान्य केरमेट भएको–क ।
३ तृतीयं द्विरदं]संशोधित पाठ ; तृतीयद्विदशं–क, ख, ग ।
४ अश्वान्तं–क ।
५ व अक्षर टुटेको–क ।
६ शिरयुतं]संशोधित पाठ ; शरयुतं–क, ख, ग ।
७ स्यन्दनार्ण्णं–ख ; स्यन्दनार्णं–ग ।
८ नरान्त्रेषुं]संशोधित पाठ ; षु अक्षर टुटेको–क ; नरान्तेषु–ख, ग ।
९ द्यं अक्षर टुटेको–क ।
१० दारिताननौ–क ।
११ नि अक्षरको अगाडिको भाग अलिकति टुटेको–क ।
१२ भस्मविलेपने–क ।
१३ जा अक्षरको अगाडिको भाग अलिकति टुटेको–क ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एवं न्यस्य महादेव शुष्कायां मातृकां शुभाम् ।
पश्चात् पूजा प्रकर्तव्या नानाकारा सुसिद्धिदा ॥ ९८ ॥
पायसैः कृशरैर्मिश्रैर्मोदकैर्लोपिकादिभिः ।
पानकानि विचित्राणि मांसानि विविधानि च ॥ ९९ ॥
महातैलेन दीपाँश्च कन्दलस्थान् प्रदापयेत् ।
पुष्पाणि सुविचित्राणि पशूनष्टविधानपि ॥ १०० ॥
एवं यष्ट्वा तु देवेशीं वित्तशाठ्यविवर्जितम् ।
पश्चात् सन्तोषयेद् भक्त्या गुरुं परमकारणम् ॥ १०१ ॥
योगिनीमथ देवेश तत् पङ्क्तिं दक्षयेत् तथा ।
एवं विधानं तत् कृत्वा कौलिकः सफलो भवेत्[1] ॥ १०२ ॥

इति श्रीमदुत्तरपीठोद्भूते श्रीश्रीनाथावतारिते श्रीकालिकाकुले पञ्चशते
द्वितीयः पटलः ॥

पानगोष्ठीको आयोजना गरी उक्त पानगोष्ठीमा चक्रपूजनको समेत आयोजना गर्नू। त्यसपछि उक्त चित्ररूप मातृकाको विभिन्न अङ्गमा बुद्धिमान् आचार्यले संहारमातृकान्यास गर्नू। (यसपछि श्लोक ९७ सम्म संहारमातृकान्यासको उद्धार गरिएको छ)। यसरी संहारमातृकान्यास गरिसकेपछि उपर्युक्त शुष्कस्वरूपकी मातृकाको पूजा गर्नू। पूजाका क्रममा खीर, लड्डु, विभिन्न किसिमका पेय पदार्थहरू, विविध किसिमका पशुपंक्षीका मासुका परिकारहरू, महातैलमा बालिएको दियो, विभिन्न प्रकारका फूलहरू, आठप्रकारका पशुपंक्षीहरू बलिका रूपमा देवीलाई समर्पण गरेर पूजा गरेपछि गुरुलाई भक्तिपूर्वक दानदक्षिणा दिई सन्तुष्ट गराउनू। त्यसैगरी योगिनी, भैरव, गणेश आदिको पङ्क्तिलाई पनि विधिपूर्वक पूजा आराधना गर्नू। यी सबै विधिविधानपूर्वक पूजा आराधना गरेमा अवश्य पनि कौलिकको जन्म सफल हुनेछ ॥ ८३–१०२ ॥

उत्तरपीठमा उद्भव भएको श्रीनाथद्वारा अवतारित **कालिकाकुलपञ्चशतक** नामक ग्रन्थमा तन्त्राचार्य माधवप्रसाद लामिछानेद्वारा नेपाली भाषानुवादसहित सम्पादित दोस्रो पटल पूर्ण भयो ।

---

१ सफलो भवेत्]संशोधित पाठ ; सफलं भवेत–क ; सफलम्भवेत्–ख; सहलम्भयेत्–ग ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तृतीयः पटलः

॥ श्रीभैरव्युवाच ॥
श्रृणु भैरवराजेन्द्र कथयामि महाद्भुतम् ।
यन्न कस्य चिदाख्यातं सिद्धानां खेचरीषु वा ॥ १ ॥
तव स्नेहात् प्रवक्ष्यामि सिद्धक्रमचतुष्टयम्[१] ।
अनाख्येया[२] परानिष्ठा ज्ञात्वा मोक्षप्रदायिका ॥ २ ॥
प्रथमः क्रमपूर्वस्तु सिद्धपूर्वो द्वितीयकः ।
संहारस्तु तृतीयः स्यादनाख्येयश्चतुर्थकः ॥ ३ ॥
एतेषां[३] क्रम राजानां सिद्धसंज्ञां[४] वदामि ते ।
पश्चान्मन्त्रं महाभीमं विद्यां सङ्कर्षिणीं तथा ॥ ४ ॥

श्रीभैरवीले भनिन्–

हे भैरवराज ! अब म एउटा महान् अद्भुत कुरो बताउँछु जुन कुरो अहिलेसम्म सिद्ध, खेचरीगण तथा योगिनीहरू कसैलाई पनि बताएको छैन । तिम्रो स्नेहले चार प्रकारको सिद्धक्रम बताउँछु । ती चार प्रकारका सिद्धक्रमहरूमध्ये पहिलो क्रमपूर्व, दोस्रो सिद्धपूर्व, तेस्रो संहार र चौथो अनाख्येयक्रम रहेका छन् । अनाख्येयक्रमरूप जुन परानिष्ठा हो त्यो मोक्ष प्रदान गर्नेवाला छ । ती चारवटा सिद्धक्रमहरूमध्ये पहिलो जुन क्रमपूर्वनामक सिद्धक्रम छ त्यसमा युगैपिच्छे अवतारकका रूपमा रहेका सिद्धहरूको उल्लेख गर्नेछु र त्यसपछि सिद्धपूर्वनामक क्रमको उल्लेख गर्नेछु । त्यसपछि महाभीममन्त्र तथा सङ्कर्षिणीविद्याको उपदेश तिमीलाई गर्नेछु ॥ १–४ ॥

आद्ये युगे[५] यथा यातं त्रेतायां द्वापरे तथा ।
चतुर्थे तु महाघोरे समासाच्छृणु[६] भैरव ॥ ५ ॥
खगेन्द्रनाथो विज्ञाम्बा[७] समायातौ कृते युगे ।

---

१ क्र अक्षर टुटेको–क ।
२ अनाख्य या–ग ।
३ एते टुटेको–क ।
४ संज्ञा–क ।
५ युग–ग ।
६ समासा पाठ पूरै टुटेको तथा च्छृणु भै पाठको माथिल्लो भाग टुटेको–क ।
७ विज्ञांवा–ग ; विज्जाम्बा–तन्त्रालोक ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

द्वितीये कूर्मनाथस्तु मङ्गलाम्बासमन्वितः ॥ ६ ॥
तृतीये मेषनाथस्तु काममङ्गलया सह ।
चतुर्थे[1] मीननाथस्तु कोङ्कणाम्बासमायुतः[2] ॥ ७ ॥
तस्य च क्रीडमानस्य सञ्जाता द्वादशात्मजाः ।
तेषां नामानि वक्ष्यामि यथाम्नायः कुलेश्वर ॥ ८ ॥
भट्टोऽमरो महेन्द्रश्च वरदो वाऽथ वल्कलः ।
चित्रश्चैव अहीन्द्रश्च अलिश्चैव गजेन्द्रकः ॥ ९ ॥
विन्ध्यो महीधरश्चैव गुडिको द्वादशः स्मृतः ।
एषा परम्परा याता[3] सिद्धानां त्रिदशेश्वर ॥ १० ॥
अथान्यच्छृणु[4] सङ्क्षेपाद् दुर्विज्ञेयं महेश्वर ।
एभ्यः षड्ऊर्ध्वरेतस्काः साधिकारास्तथापरे ॥ ११ ॥
तेषां च[5] प्रविभागं तु[6] कथयामि वृषध्वज ।
भट्टो महेन्द्रनाथश्च वल्कलश्च तृतीयकः ॥ १२ ॥
अहीन्द्रश्च गजेन्द्रश्च षष्ठश्चैव महीधरः ।
एतेऽधिकाररहिताः कथिताः सुरसत्तम ॥ १३ ॥
अमरो वरदेवश्च चित्रोऽलिर्विन्ध्यसंज्ञकः ।
गुडिकः पादनाथस्तु षष्ठश्च परिकीर्तितः ॥ १४ ॥
एते षट्काधिकारास्तु[7] कथिता भैरवेश्वर ।
निष्क्रियानन्दनाथस्तु[8] ज्ञानदीप्त्या सहैकतः ॥ १५ ॥
विद्यानन्दश्च रक्ता च द्वितीयं कथितं तव ।
शक्त्यानन्दो[9] महानन्दा[10] तृतीयं सिद्धपूजितम् ॥ १६ ॥
शिवानन्दस्तथा ज्ञेया समया तच्चतुर्थकम् ।[11]

---

१ चतु टुटेको–क ।
२ कुंकुणाम्बा–तन्त्रालोक ।
३ यातं–क ।
४ अथान्यच्छृणु]संशोधित पाठ ; अथान्यं श्रृणु–क,ख,ग ।
५ तेषां तु–ख,ग ।
६ च–ख ।
७ पछिल्लो का अक्षर लेख्न छुटेको–क ।
८ निष्क्रियानन्दनाथश्च–ख,ग ।
९ शक्त्यानन्दो]संशोधित पाठ ; शक्त्यानन्दं–क,ख,ग ।
१० महानन्दा]संशोधित पाठ ; महानन्दं–क,ख,ग ।
११ यो पाठ श्रीतन्त्रालोकको विवेक टीकामा देवीपञ्चशतिकबाट उद्धृत गरिएको पाठमा आधारित छ। शिवानन्दो महानन्दा समयातं चतुर्थक–क ; शिवानन्दो महानन्दा समायातं चतुर्थकं–ख ; शिवानन्दो महानन्दा समायातं चतुर्थकम्–ग ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

खगेन्द्राद्यादि सिद्धानां कथिता गुरुसन्ततिः ॥ १७ ॥
एतद्धि[1] कुलशास्त्रस्य रहस्यं शिवनिर्मितम् ।
न कस्यचिन्मयाख्यातं त्वदृते परमेश्वर ॥ १८ ॥

हे भैरव ! पहिलो सत्ययुग, दोस्रो त्रेतायुग, तेस्रो द्वापरयुग र चौथो महाघोरस्वरूप कलियुगमा अवतीर्ण भएका कुलाम्नायका अवतारक सिद्धहरूको सङ्क्षेपमा उल्लेख गर्छु, सुन। कृतयुग अर्थात् सत्ययुगमा खगेन्द्रनाथ तथा उनकी पत्नी विज्ञाम्बाको अवतार भयो। दोस्रो त्रेतायुगमा कूर्मनाथ तथा उनकी पत्नी मङ्गलाम्बाको अवतार भयो। तेस्रो द्वापरयुगमा काममङ्गलाका साथमा मेषनाथले अवतार लिए। चौथो कलियुगमा कोङ्कणाम्बाका साथमा मीननाथको अवतार भयो। कलियुगमा अवतार लिम पुगेका मीननाथ आफ्नी पत्नी कोङ्कणाम्बाका साथ सांसारिक क्रीडामा मग्न रहँदा उनका बाह्रजना पुत्रहरू उत्पन्न भए। मीननाथ र कोङ्कणाम्बाका ती बाह्रजना पुत्रहरूको नाम कुलाम्नायअनुसार यसप्रकार रहेको छ - १. भट्ट २. अमर ३. महेन्द्र ४. वरद ५. वल्कल ६. चित्र ७. अहीन्द्र ८. अलि ९. गजेन्द्र १०. विन्ध्य ११. महीधर १२. गुडिक। ती बाहजनामध्ये छजना ऊर्ध्वरिता अर्थात् कुलपरम्परामा अधिकारहीन छन् भने अन्य छजनाचाहिँ साधिकार रहेका छन्। भट्ट, महेन्द्र, वल्कल; अहीन्द्र, गजेन्द्र र महीधर यी छजना कुलपरम्परामा अधिकार नभएका ऊर्ध्वरिता हुन् भने अमर, वरदेव, चित्र, अलि, विन्ध्य र गुडिक यी छजना कुलपरम्परामा अधिकारले युक्त रहेका छन्। निष्क्रियानन्दनाथ तथा उनकी पत्नी ज्ञानदीप्ति, विद्यानन्दनाथ तथा उनकी पत्नी रक्ता, शक्त्यानन्दनाथ तथा उनकी पत्नी महानन्दा एवं शिवानन्द तथा उनकी पत्नी समया खगेन्द्रनाथ आदि सिद्धौघ परम्पराका गुरु एवं गुरुपत्नीहरू हुन्। शिवद्वारा निर्मित यो कुलशास्त्रको रहस्य हे परमेश्वर ! मैले तिमीबाहेक अरू कसैलाई बताएको छैन ॥ ५- १८ ॥

तथान्यच्छृणु[2] सङ्क्षेपाद् दुर्विज्ञेयं महेश्वर ।
विश्वयोनिं जगद्योनिं भावयोनिं[3] प्रजापतिम् ॥ १९ ॥
पञ्चमं कुलयोनिं च पत्नीस्तेषां श्रृणुष्व च ।
रेतयोनिर्बीजयोनिः सर्गः[4] सृष्टिस्तथैव[5] च ॥ २० ॥

---

१ एतद्धिः–क ।
२ तथान्यच्छृणु]संशोधित पाठ ; तथान्यं श्रृणु–क,ख,ग ।
३ भावयोनिं]संशोधित पाठ ; वयोनिं–क,ख,ग ।
४ सर्गः]संशोधित पाठ ;सृज–क,ख,ग ।
५ सृष्टिः]संशोधित पाठ ; सृष्टिं तथैव–क,ख,ग ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पञ्चमं क्षोभयोनिश्च[1] क्षेत्ररूपेण आगताः ।
क्षेत्रञ्च क्षेत्रपालश्च शिशुत्वाद् वटुकः स्मृतः ॥ २१ ॥
भूतानि भूतपत्नीश्च[2] दिङ्मात्रीमपि योगिनीम् ।
क्षेत्रपालेन बल्यर्थं यजेत् तत् परमेश्वर[3] ॥ २२ ॥

हे महेश्वर ! जान्न ज्यादै कठिन अर्को कुरो सङ्क्षेपमा सुन। विश्वयोनि, जगद्योनि, भावयोनि, प्रजापतियोनि र कुलयोनि यी पाँच गुरुहरू हुन् तथा रेतयोनि, बीजयोनि, सर्गयोनि, सृष्टियोनि र क्षोभयोनि यी पाँच माथि बताइएका गुरुपञ्चकका क्षेत्ररूपले वा शक्तिका रूपले आएका हुन्। शिशु भएकाले क्षेत्रपाल बटुक (बटुकभैरव) का रूपमा चिनिन्छन्। बलिप्रदानका लागि ती क्षेत्रपाल वा बटुकभैरव, क्षेत्ररूप शक्तिपञ्चक, चतुर्थपटलमा वर्णन गरिने सिद्धरूप महाभूतहरू, ती सिद्धरूप महाभूतका पत्नीरूप कहिएका तन्मात्राहरू, दिङ्मातृ एवं योगिनीलाई पूजा गर्नू ॥ १९-२२ ॥

कुलेश्वरः कुलेश्वर्या गणेशो गुरुसन्ततिः ।
शवरी कुलदूती च खचक्रं शक्तिपुष्करम् ॥ २३ ॥
एतानि पूजयेद् देव मन्त्रेणाद्यक्षरेण[4] च ।
कन्दचक्रान्तरे[5] स्थाने पूजयेत्परमेश्वर ॥ २४ ॥
अथवा बाह्यतो देव द्विपञ्चदलके कजे ।
प्रपूज्या योनयः पञ्च मध्ये कालान्तकारिणी ॥ २५ ॥
द्वितीये पञ्चके देव पत्नीस्तेषां प्रपूजयेत् ।
सिद्धा द्वाराग्रगाः पूज्या ये चान्ये गुरुसन्ततिः ॥ २६ ॥
मण्डलं[6] रक्तवर्णाभं सुसमं सुमनोरमम्[7] ।
नान्येन रजसा[8] कार्यं[9] विलोमान्मरणं भवेत् ॥ २७ ॥

कुलेश्वरीका साथ कुलेश्वर, गणेश, गुरुसन्तति, शवरी, कुलदूती, खचक्र, शक्तिपुष्करहरूलाई आद्यक्षर बीजमन्त्रले कन्दचक्रको भित्री स्थानमा आभ्यन्तरिक पूजा गर्नू अथवा पाँच पत्रवाला दुईवटा कमलमा बाह्य पूजा

---

१ नि अक्षर पूरै टुटेको तथा ञ्चको अगाडिको भाग अलिकति टुटेको–क ।
२ भूतपत्नीश्च]संशोधित पाठ ; भूतपत्नीञ्च–क ; भूतपत्नीं च–ख,ग ।
३ तत्पर टुटेको–क ।
४ मन्त्रेणाद्यक्षरेण च–क,ख ।
५ न्द अक्षर टुटेको–क ।
६ वण्डलं–क ।
७ सुमनोहरम् लेखी र अक्षरका पछाडि म थपिएको छ र सुमनोरमम् बनाउन खोजेको स्पष्ट देखिन्छ तर ह मेटिएको छैन, हको मुनि..लेखिएको–ग ।
८ रक्त–क ।
९ कार्यो–ग ।

Digitized by Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गर्नू। विश्वयोनि आदि गुरुपञ्चकलाई प्रथम पाँच पत्रवाला कमलका पातहरूमा तथा काललाई आफूभित्र लवलीन गर्ने कालीलाई मध्यकर्णिकामा पूजा गर्नू। दोस्रो पाँच पत्रवाला कमलमा गुरुपञ्चकका पत्नी कहिएका क्षेत्ररूप रेतयोनि आदिको पूजा गर्नू। खगेन्द्र आदि सिद्ध एवं अन्य गुरुसन्ततिको पूजा द्वारको अग्रभागमा गर्नू। पूजाका लागि बनाइने मण्डल रक्तचन्दन वा सिन्दूरले बनाइएको रातो रङको अत्यन्त मनोहर हुनुपर्दछ। रातो रङका अतिरिक्त अन्य रङले बनाएमा वा विधिमा बताएभन्दा उल्टो पर्न गएमा मरण हुन्छ ॥ २३–२७ ॥

अत्र मन्त्रं[१] प्रवक्ष्यामि श्रृणु खेचक्रनन्दन ।[२]
उद्धरिष्यामि देवेश योगिनीविग्रहाच्छिवात्[३] ॥ २८ ॥
अमृतार्णं तु[४] ब्रह्मार्णं[५] त्रिपिण्डं ब्रह्मसत्परम् ।
सा देवी स शिवश्चैव[६] विश्वं तस्यान्यविस्तरः[७] ॥ २९ ॥
ग्रन्थकोटिसहस्राणामेतत् सारं विचिन्तयेत्[८] ।
प्रभावोऽस्य[९] न शक्येत वक्तुं कल्पायुतैरपि[१०] ॥ ३० ॥
इदं तु निष्कलं[११] व्याप्तिः[१२] सकलं कथ्यते पुनः[१३] ।
हृदयार्णं च[१४] गुह्यार्णं[१५] द्वावेतौ शिरसोऽन्ततः[१६] ॥ ३१ ॥
योजनीयो महादेव वामस्थकर्णभूषणे ।
वामजानुयुतं देव दद्याच्छिरसि शेखर[१७] ॥ ३२ ॥

---

१ अ न मं तं–ग ।
२ अत्र पछाडिका अक्षरहरू मसी उडेकाले नबुझिने भएको–ख ।
३ वाको पछाडि चिह्न दिएर सोही हरफको सीधा देब्रेपट्टि त् लेखिएको–ग ।
४ अमृतार्णवं तु–ग ।
५ ब्रह्माण्डं–ख ; ब्रह्मांडं–ग ।
६ शिवश्चैव] संशोधित पाठ ; शिवस्तन, स्तको मुनि ..लेखिएको–ग ।
७ विश्वं तस्यान्यविस्तरः]संशोधित पाठ ; विश्व तस्यान्यविस्तरः–क ; विश्वन्तस्यान्यविस्तरः–ख,ग ।
८ मेतत्यारम्वि..र्भवेत्, भवेत्का मुनि...लेखिएको–ग ।
९ प्रभावोऽस्य– तन्त्रालोक ।
१० कल्पशतैरपि– तन्त्रालोक ।
११ निःकला–क ।
१२ व्याप्तिः]संशोधित पाठ ; व्याप्ति–क,ख,ग ।
१३ भ्रमःका मुनि...लेखिएको–ग ।
१४ च अक्षर पछि थपिएको देखिन्छ–क ; हृदयार्णन्तु–ख; हृदयार्णं तु–ग ।
१५ गुह्यान्तं–क ।
१६ शिरसान्ततः–ग ।
१७ दद्याच्छिरसि शेखर]संशोधित पाठ ; दद्याच्छिर शेषर–क ; दद्याच्छिरशेखर–ख,ग ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एतद् बीजयुगं चादौ मध्ये संज्ञां[1] प्रकल्पयेत् ।
पश्चात् पादेति देवेश सिद्धानां गुरुसन्ततौ ॥ ३३ ॥
यथा योनौ द्वियोनीषु मन्त्रमेतत् प्रकीर्त्तितम्[2] ।
अस्याः परतरं किञ्चिन्नास्ति सत्यं कुलागमे ॥ ३४ ॥
दक्षवाहुस्थितं वर्णं महानादेनसंयुतम् ।
तस्याधः शिरसोऽन्तःस्थं महायोनिमहायुतम् ॥ ३५ ॥
वामजानुशिरःक्रान्तं प्रोद्धरेत् पिण्डनायकम् ।
अनेन ज्ञातमात्रेण योगयुत्तचा महेश्वर ॥ ३६ ॥
वशीकरोति[3] वीरेन्द्रो ब्रह्मादीन् योगिनीस्तथा[4] ।
अथान्यच्छृणु देवेश बीजं बीजवरोत्तमम् ॥ ३७ ॥
सव्यश्रवणपाणिस्थं हृदयं नाभिसंयुतम्[5] ।
केवलं वामपार्श्वस्थं वामकर्णं समुद्धरेत् ॥ ३८ ॥
अधःस्थाद्योजयेद् देव कपालार्णं तृतीयकम् ।
नारान्त्रं वामपादाधो हरिमुण्डेनसंयुतम् ॥ ३९ ॥
जीवार्णं[6] योनिबीजेन संयुक्तं[7] सप्तमं हर ।
गुह्यं[8] शिरोरुहाद्यस्थं दक्षिणोरु समुद्धरेत् ॥ ४० ॥
रन्ध्रसंज्ञा महाविद्या शुष्का विग्रहकोद्धृता[9] ।
दुर्लभा त्रिदशेशानां सिद्धानां खेचरीषु च ॥ ४१ ॥
अस्याः संस्मरणादेव मेरुतुल्यो गुरुर्भवेत् ।
भस्मसाद्याति सद्यैव पापं यत् पूर्वसञ्चितम् ॥ ४२ ॥
अनया ज्ञातया देव कालिकाकुलजातया ।
सप्तसप्ततिकोटीनां विद्यानां[10] परमार्थतः ॥ ४३ ॥
अधीता तेन देवेश किमन्यैर्विस्तरेण वा ।
एवमेव हि या विद्या पूज्यते पूजकेन तु ॥ ४४ ॥

---

१ संज्ञा–ग ।
२ मन्त्रमेतत् प्रकीर्त्तितं–क ; मन्त्रमेततत्प्रकीर्त्तितं–ख ।
३ वशीकारोति–ख,ग ।
४ ब्रह्मादीनयोगिनीस्तथा–क ।
५ तम् टुटेको–क ।
६ जीवान्तं–क ।
७ युक्तं टुटेको–क ।
८ गुहं–ख ।
९ ह अक्षर लेखिएको छैन–क ।
१० पहिले लेख्न छुटेको र पछि सोही स्थानमाथि देवनागरी लिपिमा थपिएको–ख ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भाववीर्यप्रदातृत्वं नाभवेयुश्च सिद्धिदाः ।
नानया च विना किञ्चित् किमन्यैर्विस्तरैः शिव ॥ ४५ ॥

अब म योगिनीको विग्रहस्वरूप शिववक्त्रबाट मन्त्रको उद्धार गर्नेछु तसर्थ हे खेचरनन्दन ! त्यसलाई सुन । (यसपछि श्लोक २९क मा शीघ्र विद्या प्रदान गर्ने त्र्यक्षर मन्त्रको उद्धार गरिएको छ) । उक्त मन्त्र स्वयं देवी, शिव वा विश्व हो । अन्य सम्पूर्ण विस्तार सोही मन्त्रको स्वरूप हो । यस मन्त्रलाई करोडौँ ग्रन्थहरूको सारका रूपमा चिन्तन गर्नुपर्छ । यस मन्त्रको प्रभाव दशौँ हजार कल्पमा पनि बताएर सकिँदैन । (यसपछि श्लोक ४० सम्म सिद्धौघ गुरुपरम्पराका सिद्ध गुरुहरूको पूजाका लागि उपयोगी मन्त्र एवं त्यसको माहात्म्य तथा रन्ध्रविद्यानामक नवाक्षरीविद्याको उद्धार गरिएको छ) । यो रन्ध्रसंज्ञक नवाक्षरी महाविद्या देवता, सिद्ध एवं खेचरीगणहरूका लागि पनि दुर्लभ रहेको छ । यस विद्याको स्मरणमात्रले पनि साधकले मेरुतुल्य गुरुत्व प्राप्त गर्दछ । उसका पूर्वसञ्चित सम्पूर्ण पापहरू नष्ट हुन्छन् । कालिकाकुल परम्पराभित्रको यो विद्या जान्नाले साढे सात करोड मन्त्र वा विद्याको ज्ञान पाए सरह हुन्छ । यसभन्दा बढी के भन्नू ? यदि पूजकले यस विद्याको पूजा गऱ्यो भने विभिन्न किसिमका सिद्धिहरू प्राप्त हुन्छन् तथा भावनाबल प्रदान गर्ने सामर्थ्य उत्पन्न हुन्छ । पूजकले यस विद्याको पूजन गऱ्यो भने यस विद्याबाट सबै कुराको प्राप्ति हुन्छ, यस विना केही पनि हुँदैन, यसभन्दा बढी के भन्नू ? ॥ २८-४५ ॥

इयं देव महाविद्या पूज्यते पूजकेन च[1] ।
नानाविधानि द्रव्याणि कुलमार्गस्थितानि च ॥ ४६ ॥
नानाकाराणि मांसानि खजलस्थलजानि च ।
शिवानि माल्यपुष्पाणि नानाधूपानि भैरव ॥ ४७ ॥
भक्ष्यभोज्यानि सर्वाणि[2] फलमूलानि यानि च ।
वृन्तैश्च[3] शालिपुष्पैश्च भवेद् दीपान् प्रदापयेत् ॥ ४८ ॥
नरतैलेन दीपाँश्च[4] कन्दलस्थान् तु[5] वीरराट् ।
सर्वं निवेदयेदेवं यत्किञ्चिद् द्रव्यसम्भवम् ॥ ४९ ॥
कालीति विग्रहमन्यद्[1]विश्वरूपं समन्ततः ।

---

१ पूजकेन चेत्–ख,ग ; के अक्षर निर्धारित स्थानभन्दा केही अगाडि छ, पछि थपिएको जस्तो बुझिन्छ–ख ।
२ सर्वाणि पाठ नभएको–क ।
३ वृत्तैश्च–ख,ग ।
४ दीपाश्च–ग ।
५ कन्दलस्था तु–ख,ग ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पूर्णेन्दुसकलाकाराममृतोर्मितरङ्गिणीम्[२] ॥ ५० ॥
सृष्टिरूपां च विश्वस्मिंश्चित्कलानन्दरूपिणीम्[३] ।
ध्यायेतं परमेशानीं[४] खेचरत्वथसिद्धिदाम् ॥ ५१ ॥
एषः[५] सृष्टिक्रमो नाम कथितः कालिकाकुले ।
एतद्रहस्यं परमं नाख्येयं प्राकृते जने ॥ ५२ ॥
देयं कुलोद्भवानां च वीराणामुन्नतात्मनाम् ।
अन्यथा यो ददात्येव मम द्रोहः स भैरव[६] ॥ ५३ ॥

इति श्रीमदुत्तरपीठोद्भूते श्रीश्रीनाथावतारिते श्रीकालिकाकुले पञ्चशते तृतीयः पटलः ॥

पूर्णिमाको चन्द्रमाझैँ स्वरूप भएकी, चैतन्यस्वरूप अमृतसागरमा उर्लेकी तरङ्गस्वरूप भएकी, संसारमा सृष्टिका रूपमा विलसित, चित् एवं आनन्दरूप कलाले युक्त भएकी, खेचरत्व सिद्धि प्रदान गर्ने त्यस्ती विश्वरूपिणी कालीको ध्यान गर्नू तथा कुलमार्गमा उपयोगी मानिएका द्रव्यहरू, जलचर, थलचर र खेचर जीवजन्तु तथा पंक्षीको मासुका विभिन्न परिकारहरू, सुन्दर फूलमालाहरू, नाना प्रकारका धूपहरू, खाद्यपदार्थहरू, शालिपुष्पहरू, वृन्तहरू आदिद्वारा कालीको पूजा गर्नू। महातैलद्वारा बत्तीहरू बाल्नू तथा जेजति द्रव्यहरू सम्भव हुन्छ सबै कालीलाई समर्पण गर्नू। उपर्युक्त आराधनाक्रमलाई कालिकाकुलपरम्परामा सृष्टिक्रम भनिन्छ। यो परम रहस्यक्रम कालिकाकुलपरम्परामा दीक्षित नभएका प्राकृतजन (दीक्षापूर्वक संस्कारसम्पन्न नभएका)हरूलाई बताउनु हुँदैन। कालिकाकुलपरम्परामा दीक्षित भएका, वीरभावमा आरूढ भएका, उन्नत एवं उदात्त चरित्र भएकाहरूलाई मात्र यो परम रहस्यक्रम दिनुपर्छ। अन्यथापूर्वक कसैले यो रहस्यक्रम अनधिकारी व्यक्तिलाई दिन्छ भने हे भैरव ! उक्त कार्य मप्रतिको द्रोह हो ॥ ४६–५३ ॥

॥ उत्तरपीठमा उद्भव भएको श्रीनाथद्वारा अवतारित **कालिकाकुलपञ्चशतक** नामक ग्रन्थमा तन्त्राचार्य माधवप्रसाद लामिछानेद्वारा नेपाली भाषानुवादसहित सम्पादित तेस्रो पटल पूर्ण भयो ॥

---

१ विग्रहं मन्येद्–क ; विग्रहं मन्यद्–ख,ग ।
२ ममृतोस्मि,स्मिकोमुनि..दिइएको छ–ग ।
३ विश्वेस्मिंश्चत्कलानन्दरूपिणीं–क ; विश्वेस्मिंश्चत्कलानन्दरूपिणीं–ख ।
४ ध्यायेत्परमेशानीं–ख,ग ।
५ एषः]संशोधित पाठ ; एष–क,ख,ग ।
६ भैरवः–क,ख ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चतुर्थः पटलः

॥ श्रीभैरव्युवाच ॥
अथ भैरवराजेन्द्र कथयामि समासतः ।
श्रृणु चान्यत् पदार्थं तु[1] अवतारं क्रमस्थितम् ॥ १ ॥
सारेऽस्मिन्[2] कुलसद्भावे[3] यथा ज्ञास्यसि तत् पदम् ।
तथा ते कथयिष्यामि ज्ञानं परमदुर्लभम् ॥ २ ॥

श्रीभैरवीले भनिन्–

भैरवहरूमा श्रेष्ठ हे भैरवराज ! अब म पहिलो सृष्टिक्रमपछि दोस्रो अवतारक्रम सङ्क्षेपमा बताउँछु, सुन । साररूप कालिकाकुलसद्भावमा शाम्भव पदरूप परम दुर्लभ ज्ञान तिमी जसरी ग्रहण गर्न सक्छौ म त्यसरी नै तिमीलाई बताउनेछु ॥ १–२ ॥

ऊर्ध्वे तु संस्थिता सृष्टिः परमानन्दरूपिणी ।
पीयूषवृष्टिं वर्षन्ती शाम्भवी परमा[4] कला ॥ ३ ॥
अधः संहार[5] विज्ञेयो महानर्चिःकृतान्तकः[6] ।
घोरो ज्वालावलीयुक्तो[7] दुर्धर्षो ज्योतिषां निधिः ॥ ४ ॥
तयोर्मध्ये परं तेज उभयानन्दसुन्दरम्[8] ।
अवतारः स विज्ञेय उभाभ्यां व्यापकः शिवः ॥ ५ ॥
परस्परसमाविष्टौ[9] चन्द्रेऽग्निष्टीटिभे शशी[10] ॥
चन्द्रं[11] सृष्टिं विजानीयादग्निः[12] संहार उच्यते ॥ ६ ॥

---

१ परार्थन्तु–ख ; परार्थं तु–ग ।
२ न अक्षर टुटेको–क ।
३ कु अक्षर टुटेको–क ।
४ रमा पाठ टुटेको–क ।
५ मंदार–ग ।
६ ज्ञेयो महानर्चिःकृतान्तकः पाठ मसी उडेकाले नबुझिने भएको–ख ।
७ घोरोज्वालावलीयुक्तो]संशोधित पाठ ; घोराज्वालावलीमुक्तो–क,ख,ग ।
८ सुन्दर–ग ।
९ परस्परं पाठ मसी उडेकाले नबुझिने भएको–ख ।
१० रवि कीटितौ–क ; रन्द्रे (चन्दं) रविकोटिभौ–ग ।
११ चन्द्र–क ; चन्द्रःभन्दा अगाडि एउटा दण्ड दिइएको छ, त्यसभन्दा अगाडि दुईवटा जति अक्षर अट्ने ठाउँ खाली राखिएको–ग ।
१२ सृष्टिं–क,ख ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अवतारो रविः प्रोक्तो[1] मध्यस्थः[2] परमेश्वर[3] ।
मनस्तत्त्वं भवेत् सृष्टिरहङ्कृत् क्षय[4] उच्यते ॥ ७ ॥
धीतत्त्वमवतारश्च[5] तेजः संव्यापकं परम् ।
तं[6] रविं विद्धि सर्वज्ञ हृदयं कुलकौलिकम् ॥ ८ ॥

माथि परम आनन्दस्वरूप सृष्टि रहेको छ जो अमृतको वर्षा गराउँदो चन्द्रमाका रूपमा स्थित परम शाम्भव कला हो। तल अत्यन्त तेजले युक्त, प्रकाशको भण्डारस्वरूप, हेर्न अत्यन्त कठिन, घोर ज्वालाको पङ्क्तिले युक्त, सृष्ट जगत्लाई नाश गर्ने संहार रहेको छ जो अग्निका रूपमा स्थित छ। सृष्टि र संहारका बीचमा आनन्द एवं सुन्दर स्वरूपवाला परम तेज रहेको छ जो सूर्यका रूपमा स्थित छ। सृष्टि र संहारका अपेक्षामा व्यापक एवं कल्याणस्वरूप सूर्यतत्त्व अवतार भनेर जान्नुपर्छ। चन्द्रमामा अग्नि र अग्निमा चन्द्रमा परस्पर समाविष्ट छन्। चन्द्रमालाई सृष्टि र अग्निलाई संहार भनेर जान्नू। ती दुईका बीचमा रहेको रवि अवतार (स्थिति) का रूपमा शास्त्रमा बताइएको छ। मन सृष्टि हो, अहङ्कार संहार हो भने बुद्धि व्यापक परम तेजस्वरूप अवतार हो जसलाई सर्वज्ञ, हृदयस्वरूप कुलकौलिक रवि भनेर जान्नू ॥ ३-८ ॥

तच्छृण्वाद्यावतारं च[7] यथार्थं गिरिजाधव[8] ।
यन्न कस्यचिदाख्यातं तव स्नेहाद् वदाम्यहम् ॥ ९ ॥
एको द्वादशभिर्भेदैः संसृतं परमेश्वर ।
भेदैर्द्वादशभिर्येन[9] व्याप्तं सर्वमिदं[10] जगत् ॥ १० ॥
तेषु सिद्धक्रमेणैव[11] संस्थितं सचराचरम् ।

---

१ रविं प्रोक्ते–ग ।
२ मधस्थं, मधको मुनि... चिह्न दिइएको छ र सोही हरफको दाहिनेपट्टि कोष्ठकमा ब्धे लेखिएको–ग ।
३ श्वर अक्षर केरमेट भएकाले नबुझिने भएको–क ।
४ भवेसृष्टिरहंकृष्ण–ग ।
५ पीतत्वमवतारस्तु, पीको मुनि.. चिह्न दिइएको छ र सोही हरफको देब्रेपट्टि खाली ठाउँमा धी लेखिएको छ–ग ।
६ त–ग ।
७ तत्सृण्वाद्यावतारञ्च–ग ।
८ म गिरिजाधव पाठको अन्त्यमा -युग्मदण्डको प्रयोग गरिएको–ख ; गिरिजावच, यहाँ पनि पाठको अन्त्यमा युग्मदण्डको प्रयोग गरिएको–ग ।
९ भेदैर्द्वादशभिर्योत–ग ।
१० सर्वमिदं, दंको मुनि.. चिह्न दिइएको–ग ।
११ तस्मिन् सिद्धिक्रमेणैव–क ; तस्मिन्सिद्धक्रमेणैव–ख,ग ।

CC-0. Panini Kanya Maha Vidyalaya Collection.

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

येषु कृत्वावतारं च यत्किञ्चिद् वाङ्मयं जगत् ॥ ११ ॥
तेनोद्धृतं महाभागं सिद्धपत्नीसमाकुलम् ।
सिद्धांश्च[1] सिद्धपत्नीश्च अवतारकुलक्रमम् ॥ १२ ॥
आम्नायं कुलसन्तत्याः कथयामि वृषासन ।
मन्त्रं चैव तथा[2] विद्यां पूजां सत् कौलिकीं[3] शुभाम् ॥ १३ ॥
समासान्नान्यमनसा[4] श्रृणु विज्ञानसुन्दर ।
मेदिनी वरुणं चैव तेजसं मारुतं[5] तथा ॥ १४ ॥
नभः श्रवणसंस्थं तु त्वचस्थं चक्षुषं तथा ।
जिह्वाख्यं घ्राणकं चैव मनाख्यं बुद्धिकं तथा ॥ १५ ॥
एते द्वादशसिद्धाश्च पत्नीस्तेषां[6] श्रृणुष्व मे ।
गन्धिनी रसिनी चैव रूपिणी स्पर्शिणी तथा ॥ १६ ॥
शब्दाख्या वाक्करानाख्या पादिनी पायुसंज्ञिका ।
उपस्थिनी अहङ्कारी प्रकृतिर्द्वादशी मता ॥ १७ ॥
इमास्ता[7] अवतारस्य[8] पूजनीयाः प्रयत्नतः ।
अत्र मन्त्रं प्रवक्ष्यामि कुलाम्नायोदितं शिव ॥ १८ ॥

हे पार्वतीवल्लभ ! त्यो आदि अवतारक्रम जुन अहिलेसम्म कसैलाई पनि बताएको छैन्, तिम्रो स्नेहले म यथार्थरूपले बताउँदैछु, सुन । हे परमेश्वर ! एउटै परम तत्त्व बाह्रवटा भेदले संसारमा फैलिएको छ र तिनै बाह्रवटा भेदले यो संसार व्याप्त छ । तिनै बाह्रवटा भेदमा अवतीर्ण भएर यो सम्पूर्ण नामरूपात्मक जगत् तिनै बाह्रवटा भेदहरूमा सिद्धक्रमले रहेको छ । त्यसैले हे महाभाग ! सिद्ध एवं सिद्धपत्नीहरू, तिनीहरूको समूह र अवतारक्रम पनि यहाँ उद्धार गरिएको हो । साँढेलाई आसन बनाएर बस्नु भएका हे प्रभु ! कुलसन्ततिमार्ग (कालिकाकुलाम्नाय), तदुपयोगी मन्त्र, विद्या, कल्याणकारक कौलिकी पूजा सङ्क्षेपमा बताउँछु त्यसैले हे विज्ञानसुन्दर ! एकाग्रचित्तले सुन । पृथिवी, जल, तेज, वायु, आकाश, श्रोत्र, त्वक् (छाला), चक्षु, जिह्वा, घ्राण (नाक), मन र बुद्धि यी बाह्र सिद्धहरू हुन्

---

१ सिद्धाश्च–ग ।
२ मन्त्रश्चैव तथा–ख ; मन्त्रदैवतया–ग ।
३ सत्कौलिकां–ख ।
४ समासामान्यमनसा, माको मुनि ..चिह्न दिइएको छ र सोही हरफको दाहिनेपट्टि कोष्ठकमा (न्ना) लेखिएको–ग ।
५ वरुणं–क ।
६ पत्नी तेषां–ख,ग ।
७ इमास्ता पाठ केरमेट भएको–क ।
८ अ अक्षर केरमेट भएको–क ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भने पञ्चतन्मात्रा, पञ्चकर्मेन्द्रिय एवं अहङ्कार (री) र प्रकृति यी बाह्र सिद्धपत्नीहरू हुन्। कालिकाकुलाम्नायसम्मत अवतारक्रमका यी देवीहरूको यत्नपूर्वक पूजा गर्नुपर्छ। हे शिव! अब यहाँ कुलाम्नायमा प्रकट भएको मन्त्र भन्छु ॥ ९–१८ ॥

हृदयं चैव गुह्यस्थं शिरोरुह तथान्तिमम्।
वामकर्णाद् भूषणस्थं लाञ्छितं[1] वामजानुकम्[2] ॥ १९ ॥
वामजानुयुते कुर्यादेते पिण्डाक्षरे हर।
आदावेते ततः संज्ञा पश्चात् पादप्रकल्पना ॥ २० ॥
एतदेव विधानं तु सिद्धानां दूतिशालिनाम्।
विद्यां च कथयिष्यामि[3] मुखपारम्परागताम्[4] ॥ २१ ॥
हृदयस्थं[5] नितम्बस्थं सव्यश्रवणभूषणम्।
वामोरुस्थमधो न्यस्य वामजानुस्थसंयुतम् ॥ २२ ॥
प्रोद्धृतं प्रथमं पिण्डं विद्याबीजमनुत्तमम्[6]।
भूषणं सव्यकर्णस्य हृदयं नाभिसंयुतम् ॥ २३ ॥
वामपार्श्वगतं चैव वामकर्णं च भैरव।
कपालमालिकान्तस्थं योज्यमस्य महात्मनः ॥ २४ ॥
मध्यस्कन्धं केवलं च कण्ठं केवलमुद्धरेत्।
भुजङ्गार्णं[7] सनाभिस्थं नितम्बं केवलं हर ॥ २५ ॥
वामस्कन्धं च देवेश सव्यदंष्ट्रासमायुतम्[8]।
योगेश्वरि[9] पदं पश्चाद् गुह्यं पश्चात् समुद्धरेत् ॥ २६ ॥
दक्षदंष्ट्रासमायुक्तं उद्धृतं परमेश्वर।
कुलेन[10] संयुता[11] विद्या प्रोक्ता सप्तदशाक्षरा ॥ २७ ॥
उद्धृता देवदेवेन शिवेन परमात्मना।
नैतस्याः सदृशी विद्या विद्यते भुवनोदरे ॥ २८ ॥

---

१ छितं पाठ टुटेको–क।
२ वा अक्षर टुटेका–के।
३ कथयि पाठ टुटेको–क।
४ पारंपरागतं–क।
५ हृदयंस्थं–ख।
६ त्तमम् पाठ टुटेको–क।
७ भुजङ्गान्तं–क।
८ समामुतं–क।
९ योगेश्वरे–ख,ग।
१० कुलेन]संशोधित पाठ ; कुलास्तु–क,ख,ग।
११ संयुतां–ख,ग।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अनुग्रहं यदा प्राप्तं कदाचित् कल्मषक्षयात् ।
तदियं शक्तिपातेन प्राप्यते पुण्यकर्मभिः ॥ २९ ॥
द्वादशादित्यरूपेण स्थिता सा परमा कला ।
द्वादशारे तु हृच्चक्रे पूजनीया सुरेश्वरी[1] ॥ ३० ॥
अथवा बाह्यतो देव द्वादशारे तु चक्रके ।
राजवर्तेन रजसा रञ्जयेत् परमेश्वर ॥ ३१ ॥
सिद्धांश्च सिद्धपत्नीश्च[2] उदरस्थाः प्रपूजयेत् ।
मध्ये तां कालिकां देवीं[3] विद्यां सप्तदशाक्षराम् ॥ ३२ ॥
पूजयेद् विविधैः पुष्पैर्भक्ष्यभोज्यान्नपानकैः ।
मांसैर्नानाविधैश्चापि धूपैर्बहूविधैस्तथा ॥ ३३ ॥
फलमूलामिषैश्चैव तर्पयेत् परमेश्वर ।
सिद्धपत्नी पुनर्देव्याः पश्चात् पादेति योजयेत् ॥ ३४ ॥
एषः[4] सङ्क्षेपतः प्रोक्तः सोऽवतारक्रमागमः[5] ।
गोपनीयः सदा देव न दद्याद्यस्यकस्यचित् ॥ ३५ ॥
अन्यथा मृत्युभाक् स स्यादित्याज्ञा पारमेश्वरी ।
अथातः सम्प्रवक्ष्यामि घोररूपं महाद्भुतम्[6] ॥ ३६ ॥

(यसपछि श्लोक २७ सम्म द्वादश सिद्धहरूको मन्त्र र सत्र अक्षरले युक्त कुलविद्या(मातृसद्भावमन्त्र)को उद्धार गरिएको छ)। यो सत्र अक्षरले युक्त कुलविद्या स्वयं परमात्मा शिवद्वारा उद्धार गरिएको हो। योजस्तो विद्या संसारमा अर्को कुनै छैन। पुण्यकर्मका कारण कुनै बखत चित्तमा रहेको कल्मष क्षय भएपछि शक्तिपातद्वारा भगवान्को अनुग्रह भयो भने यो विद्या प्राप्त गरिन्छ। ती परमा कला बाह्र आदित्यका रूपमा रहेकी छिन्। ती भगवती सुरेश्वरीको पूजा बाह्र दल भएको कमलले युक्त अन्तर हृदयचक्रमा वा बाह्र दलले युक्त बाह्य पद्मचक्रमा गर्नुपर्दछ। सो बाह्य बाह्र दलयुक्त पद्मचक्रलाई रातो राजवर्तले रङाउनू। बाह्रवटा कमलपत्रमा सिद्धहरूलाई पूजा गर्नू तथा पत्रहरूको माझमा सिद्धपत्नीहरूको पूजा गर्नू। यति गरिसकेपछि सप्तदशाक्षरीविद्यास्वरूप कालिकालाई द्वादशदलयुक्त कमलचक्रको मध्यकर्णिकामा विविध किसिमका फूलहरू, भक्ष्यभोज्यान्न,

---

१ सुरेश्वरी]संशोधित पाठ ; सुरेश्वरि–क,ख,ग ।
२ सिद्धपत्नींश्च–क ।
३ कौलिकीं देवीं–ख ; कौलिकीदेवीं–ग ।
४ एषः]संशोधित पाठ ; एष–क,ख,ग ।
५ सोवतारक्रमाशयः–ग ।
६ द्भुतम् पाठ टुटेको–क ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पेयद्रव्य, नाना किसिमका मासुका परिकारहरू, विभिन्न किसिमका धूपहरू, फलफूल, आमिषान्नद्वारा पूजा गरी भगवती कालीलाई तृप्त पार्नू। यो अवतारक्रम सङ्क्षेपमा भनियो। यो क्रम जो पायो त्यसलाई दिनु हुँदैन, यसलाई अत्यन्त गोप्य राख्नुपर्छ अन्यथा त्यो मृत्युभागी बनोस् भन्ने परमेश्वरीको आज्ञा रहेको छ। अब म बाह्यसृष्टि विनाशका लागि अत्यन्त घोररूप, महान् अद्भुत संहारक्रम बताउनेछु ॥ १९–३६ ॥

बाह्यसृष्टिविनाशार्थं[1] संहारे परमेश्वर ।
ब्रह्मविष्णिवन्द्ररुद्राणां क्षणात् संहारकारकम् ॥ ३७ ॥
तच्छृणुष्व समासेन योगिनीकुलनन्दन ।
या सा वीरेश्वरी[2] देव[3] घोरा घोरतरा परा ॥ ३८ ॥
अघोरा सा महादेव भेदत्रयतया स्थिता ।
योगेश्वरी[4] महारौद्री[5] भीषणा चातिभीषणा ॥ ३९ ॥
नववर्णा महाक्रूरा पुनः सा द्वादशाक्षरा[6] ।
कालाग्निकुहरोत्था सा विद्युत्कोटिसमप्रभा[7] ॥ ४० ॥
ग्रसते सर्वतत्त्वानि बिन्दूर्ध्वव्यापिनी हर ।
बिन्दुमार्गे[8] प्रबुद्धा सा सृष्टिस्थितिविनाशिनी ॥ ४१ ॥
सूर्यसोमावुभौ मध्ये ग्रसतेऽग्निस्वरूपिणी ।
एषा भैरवमध्यस्था भैरवीरवसंयुता ॥ ४२ ॥

अब म बाह्यसृष्टि विनाशका लागि अत्यन्त घोररूप, महान् अद्भुत संहारक्रम बताउनेछु। हे योगिनीकुलनन्दन! त्यो संहारक्रम सङ्क्षेपमा बताउँछु, सुन। हे देव! हे महादेव! घोर, घोरतर र अघोररूपकी जो पराशक्ति वीरेश्वरी हुन् ती सृष्टि, स्थिति र संहारस्वरूप चन्द्र, सूर्य र अग्निरूप तीन भेदले रहेकी छिन्। महारौद्रस्वरूप भएकी, अत्यन्त डरलाग्दो रूप भएकी, अत्यन्त भीषण स्वरूप भएकी, महाक्रूर स्वरूप भएकी, प्रलयकुण्डबाट उठेकी, करोडौँ सूर्यसमान तेजले युक्त भएकी ती योगेश्वरी नवाक्षरी विद्यास्वरूप एवं पुनः द्वादशाक्षरी विद्यास्वरूपकी छिन्। हे हर!

---

१ वा अक्षर टुटेको–क ; बाह्यसृष्टिविनाशार्थ–ग ।
२ श्वरी पाठ टुटेको–क ।
३ दे अक्षर टुटेको–क ।
४ योगेश्वरी]संशोधित पाठ ; योगेश्वरा–क,ख,ग ।
५ महारौद्री]संशोधित पाठ ; महारौद्रा–क,ख,ग ।
६ द्वादशा पाठ टुटेको–क ।
७ म अक्षर लेख्न छुटेको–क ।
८ वित्तमार्गे–क ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बिन्दुभन्दा माथि रहेकी ती वीरेश्वरीले सम्पूर्ण तत्त्वहरूलाई ग्रास गर्छिन् अर्थात् सम्पूर्ण चराचर जगत्लाई संहारदशामा आफूभित्र नै लीन गर्छिन्। सृष्टि र स्थितिको चक्रलाई विनाश गर्ने वा संहारदशामा आफूभित्र नै लीन गर्ने ती वीरेश्वरी बिन्दुमार्गमा प्रबुद्ध हुन्छिन्। सूर्य, अग्नि र चन्द्रस्वरूप त्रिधामको मध्यमा प्रलयाग्निस्वरूपले रहेकी ती वीरेश्वरी सृष्टिस्वरूप चन्द्रमा र अवतार (स्थिति) स्वरूप सूर्य दुवैलाई ग्रास गर्छिन्। भैरवको माझमा रहेकी वीरेश्वरी भैरवीनादले युक्त छिन् ॥ ३७–४२ ॥

नामभेदेन वक्ष्यामि वीरानेकादशान् श्रृणु ।
अघोरं प्रथमं नाम महाघोरं[1] द्वितीयकम् ॥ ४३ ॥
तृतीयं घोरघोरोग्रं चतुर्थं घोरघर्घरम्[2] ।
पञ्चमं भीमवपुषं षष्ठं घोरपराक्रमम् ॥ ४४ ॥
सप्तमं चण्डचण्डेशं चण्डतेजस्तथाष्टमम् ।
नवमं रौद्ररौद्रं तु दशमं रुद्रपिङ्गलम् ॥ ४५ ॥
एकादशं महावीरं रुद्राश्चैकादशः स्मृताः ।
एभ्यः परतरं नास्ति विश्वेऽस्मिन् सचराचरे ॥ ४६ ॥

अब म एकादश वीरहरूको नाम बताउँछु, सुन। ती एकादश वीरहरू हुन्- १. अघोर २. महाघोर ३. घोरघोरोग्र ४. घोरघर्घर ५. भीमवपुष ६. घोरपराक्रम ७. चण्डचण्डेश ८. चण्डतेज, ९. रुद्ररौद्र १०. रुद्रपिङ्गल ११. महावीर। यी एकादश वीरहरूभन्दा परतर यस संसारमा कोही छैन ॥ ४३- ४६ ॥

संहारकरणे शाक्ते भैरवो भैरवीप्रिये ।
एतद्वीर्यात् समुत्पन्ना भैरव्यो[3] या महेश्वर ॥ ४७ ॥
तासां नामानि वक्ष्यामि संहारचक्रनायिकाः ।
महाभूतेति च पदं महाभक्षपदं तथा ॥ ४८ ॥
भक्षिणीति तथा देव्याः प्रथमा चक्रनायिका ।
महाभवान्तेति पदं महाभक्षमतः परम् ॥ ४९ ॥
भक्षिणीति पदं पश्चाद् द्वितीया चक्रनायिका ।
महाकालकलावृत्तिमुद्धरेच्च महापदम् ॥ ५० ॥
भक्षभक्षिणि च तथा तृतीया दुर्जया परा ।
महारक्तेश्वरिपदं[4] महारक्तपदं तथा[1] ॥ ५१ ॥

---

१ महोरं–ग ।
२ घोरर्घर्घरं–ख ।
३ भैरव्या–ख ।
४ क्ते अक्षर केरमेट भएको–ग ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

महाभक्षभक्षिणीति चतुर्थी[२] चक्रनायिका[३] ।
महाकरालि संलिख्यानीन्द्रियाणि पदं महा[४] ॥ ५२ ॥
भक्षभक्षिणि[५] देवेश पञ्चमी चक्रनायिका ।
महाचण्डाक्षिविषया महाभक्षपदं ततः ॥ ५३ ॥
भक्षिणीति[६] पदं चान्ते षष्ठी सा चक्रनायिका ।
महोच्छुष्मप्रभोद्धार्या महाद्वारपदं तथा[७] ॥ ५४ ॥
भक्षभक्षिणी[८] तत्रान्ते[९] सप्तमी परिकीर्तिता ।
महाकालरात्रिपदं रुद्ररौद्रमहा[१०] ततः ॥ ५५ ॥
भक्षभक्षिणिसंज्ञा च देवी ज्ञेया ततोऽष्टमी ।
महाचण्डेश्वरिपदं चण्डकर्मा[११] महा तथा ॥ ५६ ॥
भक्षभक्षिणि चैवान्ते नवमी त्रिदशेश्वर ।
महा...भैरवि[१२] वीरनायकसंयुता[१३] ॥ ५७ ॥
महाभक्षभक्षिणी च दशमी परिकीर्तिता ।
महावीरपदं सर्वग्रासवर्णपदं महा ॥ ५८ ॥
भक्षभक्षिणि च पदं[१४] प्रोक्ता देव दशाधिका ।
आभिः सर्वमिदं विश्वं[१५] संहृतं विश्वसंहृतौ ॥ ५९ ॥

विश्वसंहाररूप भैरवीको प्रिय कार्यमा तत्पर रहने भैरवीहरू यिनै एकादश रुद्रहरूको तेजबाट उत्पन्न भएका हुन् । अब म संहारकार्यमा तत्पर रहने ती एकादश चक्रनायिकाहरूको नाम बताउँछु । ती एकादश

---

१ महारक्तं तथा पदं–क ; महारक्तपदंदेखि पञ्चमपटलको ५८ श्लोकसम्मको अनुपलब्ध–ख ।
२ र्थी अक्षर टुटेका–के ।
३ मा.क चक्र पाठ टुटेको–क ।
४ तथा–ग ।
५ भक्षभक्षिणि–ग ।
६ क्षणीति पाठ टुटेको–क ।
७ महा–क ।
८ अभक्षभक्षिणि–ग ।
९ चान्ते–ग ।
१० द्ररौ अक्षर टुटेको–क ।
११ चण्डकर्म–क, चण्डेकर्म–ग ।
१२ महाभन्दा पछाडि तीन अक्षर टुटेको–क ; महाभन्दा पछाडि तीन अक्षरको स्थान खाली राखिएको–ग ।
१३ संयुतं–क ।
१४ पलं–ग ।
१५ विश्व–ग ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चक्रनायिकाहरू हुन्- १. महाभूतमहाभक्षभक्षिणी २. महाभवमहाभक्षभक्षिणी ३. महाकालकलामहाभक्षभक्षिणी ४. महारक्तेश्वरिमहारक्तमहाभक्षभक्षिणी ५. महाकरालिमहाभक्षभक्षिणी ६. महाचण्डाक्षविषयामहाभक्षभक्षिणी ७. महोच्छुष्मप्रभामहाद्वारभक्षभक्षिणी ८. महाकालरात्रि–रुद्र–रौद्र–महाभक्षभक्षिणी ९. महाचण्डेश्वरी–चण्डकर्मा–महाभक्षभक्षिणी १०. महाभैरवीवीरनायकमहाभक्षभक्षिणी ११. महावीरसर्वग्रासवर्णमहाभक्षभक्षिणी । यिनै संहारचक्रनायिकाले विश्वको संहार अवस्थामा समस्त चराचर जगत्लाई आफूभित्रै लीन गराउँछन् ॥ ४७-५९ ॥

अत्र मन्त्रं प्रवक्ष्यामि श्रृणु भैरवनायक ।
समासेन यथाकथ्यं कथयामि वृषासन ॥ ६० ॥
हृदयं वामचक्षुस्थं वामजानुकसंस्थितम् ।
देव्या नादं तथा देव कपालं प्रथमं हर ॥ ६१ ॥

हे भैरवनायक ! हे वृषासन ! अब म यहाँ सङ्क्षेपमा जति बताउन मिल्छ वा प्रकाश गर्न सकिन्छ त्यति एउटा मन्त्र बताउँछु, सुन । (यसपछि तीन अक्षरवाला मन्त्रको उद्धार गरिएको छ) । उक्त मन्त्र एकादश वीरहरू तथा एकादश चक्रनायिकाहरूको नामको अगाडि तथा पछाडि प्रयोग गर्नुपर्छ ॥ ६०–६१ ॥

हतोऽसौ ब्रह्मदण्डेन मन्त्र एषस्त्रिधाक्षरः[1] ।
आद्यन्ते सम्प्रयोक्तव्यौ वीराणां भैरवीषु च ॥ ६२ ॥
अथान्यामुद्धरिष्यामि[2] विद्यां संहारभैरवीम् ।
त्र्यक्षरं प्रोद्धरेदादौ[3] तथान्यच्श्रृणु[4] भैरव ॥ ६३ ॥
दक्षबाहुस्थितं वर्णं नादोऽस्याधो व्यवस्थितम्[5] ।
शिरोरुहान्तःसंस्थं तु महायोनिसमायुतम् ॥ ६४ ॥[6]
वामजानुयुतं[7] देव[8] प्रोद्धरेद् बीजनायकम् ।
भूषणं दक्षकर्णस्य हृदयं नाभिसंयुतम् ॥ ६५ ॥[9]

---

१ राषस्त्रिधाक्षरः–ग ।
२ अथाभ्यां उद्धरिष्यामि–ग ।
३ तूद्धरेदादौ–ग ।
४ न्य. अक्षर लेख्न छुटेको–क ।
५ व्यवस्थितः–क ।
६ यो पूरै हरफ मसी उडेकाले नबुझिने भएको–क ।
७ मसी उडेकाले नबुझिने भएको–क ।
८ दे अक्षर मसी उडेकाले नबुझिने भएको–क ।
९ नाभिसंयुतम्देखि घोररूपंसम्मको पाठ मसी उडेकाले नबुझिने भएको–क ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वामपार्श्वस्थितं वर्णं वामकर्णमथोद्धरेत्[1] ।
कपालान्तःसमारूढं घोररूपं भयानकम् ॥ ६६ ॥
विष्णुमुण्डसमासीनं मन्त्रान्तं[2] च महेश्वर ।
जीवं योनिसमायुक्तं गुह्यार्णं गिरिजाधव ॥ ६७ ॥ [3]
शिरोरूहाद्यसंयुक्तमतोऽन्यत् सुरवन्दित[4] ।
दक्षिणोरुसमासन्नं वर्णं[5] तच्च नपुंसकम् ॥ ६८ ॥
एषा विद्या[6], महाविद्या विद्याविद्येश्वरेश्वरी ।
नाम चाख्या न चोच्चार्या संहारकरणी यतः ॥ ६९ ॥[7]

अब म संहारभैरवीविद्याको उद्धार गर्नेछु । उक्त संहारभैरवीविद्याको प्रारम्भमा माथि उद्धार गरिएको त्र्यक्षर (तीन अक्षरवाला) मन्त्रको उद्धार गर्नुपर्छ । (यसपछि श्लोक ६८ सम्म संहारभैरवीविद्याको उद्धार गरिएको छ) । यो संहारभैरवीविद्या महाविद्या हो, विद्येश्वरीहरूको पनि विद्येश्वरी विद्या हो । कालिकाकुलपरम्परामा दीक्षा ग्रहण नगरेकाहरूका अगाडि यो महाविद्याको नाम लिनु र यसको उच्चारण गर्नु हुँदैन ॥ ६२–६९ ॥

पूजयेद् बिन्दुमार्गोर्ध्वं महातेजस्वरूपिणीम्[8] ।
भावाभावेषु सर्वेषु संहारे चक्रनायिकाम् ॥ ७० ॥
महातेजोवतीं दीप्तां बिन्दूर्ध्वपदगामिनीम् ।
तत्र पूज्या प्रयत्नेन स्वसंवेदनतत्परैः ॥ ७१ ॥[9]
अथवा[10] छुरिकां[11] स्थाप्य कर्तरीं वा सुदारुणाम् ।
महामुकुटपृष्ठे[12] तु पूज्या संहारभैरवी ॥ ७२ ॥
रुद्रैकादशसंयुक्ता भैरव्येकादशाक्षरा ।[13]
नानाविधानि[1] वस्तूनि नानाद्रव्याणि दापयेत् ॥ ७३ ॥

---

१ नामकर्णमथोद्धरेत्–ग ।
२ मन्त्रार्णं–ग ।
३ गुह्यार्णदेखि सुरवन्दितभन्दा अगाडिको पाठ मसी उडेकाले नबुझिने भएको–क ।
४ मतोन्यं सुरवन्दित–क,ग ।
५ वर्ण–ग ।
६ राधाविद्या–ग ।
७ नाम चाख्यादेखि मार्गोर्ध्वं सम्मको पाठ मसी उडेकाले नबुझिने भएको–क ।
८ स्वरूपिणी–ग ।
९ यो पूरै हरफ मसी उडेकाले नबुझिने भएको–क ।
१० मसी उडेकाले नबुझिने भएको–क ।
११ च्छुरिकां–ग ।
१२ कु अक्षर लेख्न छुटेको–ग ।
१३ यो पूरै हरफ मसी उडेकाले नबुझिने भएको–क ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तत् सर्वमग्रतो देयं भैरवी यत्र पूजिता ।
सप्तसागरपर्यन्तं मेदिनीमोषधींस्तथा ॥ ७४ ॥
समुद्रास्तत्र सङ्कल्प्या[२] रुधिरेण महेश्वर ।
योन्युद्भवं जगत् सर्वं पशुरूपेण कल्पयेत् ॥ ७५ ॥
दिवौकसश्च पशवो ब्रह्मविष्ण्वीश्वरादयः ।
पशुर्मृत्युः[३] पशुः कालः पशुर्लम्बोदरस्तथा ॥ ७६ ॥
पशुर्धर्मस्तथा धर्म्यः[४] सर्वं पशुमयं भवेत् ।
एवं मानसयागं तु वाक्ये कुर्याद् यथाविधिः ॥ ७७ ॥
सर्वं मुकुटपृष्ठे तु दद्यान्नैवेद्यकं सदा ।
विधिना वज्रमुदकं महालोहितमेव वा ॥ ७८ ॥
नालाह्यबीजे[५] गोजातं छागं नारं च मीनजम् ।
जलजांस्थलजांश्चैव[६] अन्तरिक्षगतांस्तथा[७] ॥ ७९ ॥
सर्वं निवेदयेद् देव्यै[८] पानकानि तथैव च ।
पलाण्डुं लशुनं चैव मण्डूकान् कृशरांस्तथा ॥ ८० ॥
क्षीरिणी[९] लेह्य[१०] पेयानि मित्राणि कुसुमानि च ।
नानाविधांस्तथा धूपान् नानादीपाँश्च दापयेत् ॥ ८१ ॥
पशूंश्च विविधान् सम्यग्ग्राम्यवास्यवटून्यपि[११] ।
सर्वं निवेदयेत् तत्र वित्तशाठ्यं[१२] न कारयेत् ॥ ८२ ॥
नित्यं पूजा प्रकर्तव्या यदीच्छेत् खेचरीं[१३] गतिम् ।

---

१ अघिल्लो ना अक्षर मसी उडेकाले नबुझिने भएको–क ।
२ संकल्या लेखी कोष्ठकमा (संकल्प्या) लेखिएको–ग ।
३ पशु मृत्युः–क ।
४ धर्मः–ग ।
५ नाराज्य लेखी कोष्ठकमा (नालाह्य) लेखिएको–ग ।
६ जलजान्स्थलजांश्चैव–ग ।
७ अन्तरीक्षगतास्तथा–ग ।
८ ग देव्याः–क,ग ।
९ क्षीरणी–ग ।
१० लेक्ष–क, लक्ष–ग ।
११ सम्यक् ग्राम्यवास्यवटून्यपि–क ।
१२ वित्तसाठ्यं–क ।
१३ यदित्छेत्खेचरी–ग ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इत्थं समग्रं[1] कथितं क्रमं[2] संहारसंज्ञकम् ॥ ८३ ॥
गोपयेत् प्राणवद् यत्नादित्याह परमेश्वरी ॥ ८४ ॥

इति श्रीमदुत्तरपीठोद्भूते श्रीश्रीनाथावतारिते श्रीकालिकाकुले पञ्चशते चतुर्थः पटलः ॥

अत्यन्त तेजिलो स्वरूप भएकी, बिन्दुस्थानभन्दा माथि रहेकी संहारचक्रनायिकालाई बिन्दुमार्गभन्दा माथि आफ्नो चित्त लगाएर भावरूप पदार्थहरूमा तथा अभावरूप शून्यमा उनको व्यापकताको चिन्तन गर्दै एकादश वीर वा रुद्रहरूका साथमा मानसिक पूजा गर्नुपर्छ अथवा धारिलो छुरी, कैंची वा निर्मल ऐना स्थापना गरी ती वस्तुहरूमा विभिन्न प्रकारका द्रव्यहरू अर्पण गरेर वीरहरूका साथमा संहारभैरवीको पूजा गर्नुपर्छ। सात समुद्रपर्यन्त पृथिवी तथा औषधिहरू सबैथोक संहारभैरवीलाई अर्पण गरेको चिन्तन गर्नुपर्छ। हे महेश्वर! समुद्रहरू रगतको कल्पना गर्नुपर्छ। यो समग्र चराचर जगत्लाई पशुरूप कल्पना गर्नुपर्छ। ब्रह्मा, विष्णु, ईश्वर, देवताहरू, गणेश, यम, धर्म, धर्म्य सबैथोकलाई पशुमय कल्पना गर्नुपर्छ र यसप्रकार यथाविधि मानसयाग गर्नुपर्छ। विधिपूर्वक वीर्य, रज, थुक आदि कुलद्रव्य तथा जलचर, स्थलचर र खेचर पशुपन्छीको मासु, प्याज, लसुन आदि भोज्यपदार्थ, विभिन्न प्रकारका फूलहरू, धूपहरू देवीको मुकुटपृष्ठमा चढाउनु पर्छ। पूजामा धनको कन्जुस्याइँ वा घमण्ड गर्नुहुँदैन। यदि खेचरीगति चाहने हो भने विधिपूर्वक माथि बताएझैँ सधैँ भगवतीको पूजा गर्नुपर्छ। यसप्रकार समग्र संहारक्रम बताइयो। उक्त संहारक्रम आफ्नो प्राणलाई झैँ अत्यन्त गोप्य राख्नू भनी परमेश्वरीले बताइन् ॥ ७०-८४ ॥

॥ उत्तरपीठमा उद्भव भएको श्रीनाथद्वारा अवतारित **कालिकाकुलपञ्चशतक** नामक ग्रन्थमा तन्त्राचार्य माधवप्रसाद लामिछानेद्वारा नेपाली भाषानुवादसहित सम्पादित चौथो पटल पूर्ण भयो ॥

---

१ समग्र–ग।
२ क्रम–ग।

CC-0. Nepal Sanskrit Academy, Kathmandu.

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पञ्चमः पटलः

॥ श्रीभैरव्युवाच ॥
श्रृणु वक्ष्यामि तत् सर्वं वक्त्राद् वक्त्रेषु यत् स्थितम्[1] ।
अकथ्यं परमं सारं वाच्यवाचकवर्जितम् ॥ १ ॥
अन्यशास्त्रोपमाहीनं दुर्विज्ञेयं दुरासदम् ।
नाद्यापि[2] विदितं यच्च सिद्धानां बोधशालिनाम् ॥ २ ॥
पारम्पर्यक्रमायातं सञ्चरन्तं मुखान्मुखम् ।
तच्छृणुष्व महाप्राज्ञ यथावत् कालिकाक्रमम् ॥ ३ ॥

श्रीभैरवीले भनिन्–

हे महाप्राज्ञ ! परम्पराक्रमले एउटा वक्त्रबाट अर्को वक्त्र हुँदै प्रवाहित भएको कालिकाकुलक्रमको जुन ज्ञानधारा छ त्यो ज्ञानको परम साररूप, वाच्य तथा वाचकले वर्जित, अकथ्य, अन्य शास्त्रसँग तुलना गर्न नसकिने, बुझ्न ज्यादै कठिन र दुष्प्राप्य रहेको छ। अहिलेसम्म सिद्धहरू तथा बोधशाली व्यक्तिहरूले पनि नजानेको ज्ञानको परम साररूप त्यो कालिकाक्रम म तिमीलाई बताउँछु, सुन ॥ १-३ ॥

यत् तद् ब्रह्म परं धाम व्योमातीतं[3] निरामयम् ।
निष्कलुषं[4] परं शुद्धं[5] निर्विकारं निराश्रयम् ॥ ४ ॥
कैवल्यं च निराधारं सर्ववाग्जालवर्जितम् ।
निस्तत्त्वं परमात्माख्यं अजं शान्तं ध्रुवं शिवम्[6] ॥ ५ ॥
भावाभावपदैर्हीनं[7] भावनापरिवर्जितम् ।
हानादानपदैर्मुक्तं[8] सर्वगं परमेश्वरम् ॥ ६ ॥
शक्त्यातीतं गुणातीतं सर्वद्वन्द्वविवर्जितम् ।
क्षरश्चाक्षरभावेन भाव्यं तन्न कदाचन[9] ॥ ७ ॥

---

१ यस्थितम्–ग ।
२ द्या अक्षर अलिकति टुटेको–क ।
३ मा अक्षर टुटेको–क ।
४ निःकलुषं–क ; निकूलं च–ग ।
५ परंशुद्धि–ग ।
६ शि अक्षरका अगाडि खाली ठाउँ छोडिएको छ र वम् लेख्न छुटेको –ग ।
७ वप अक्षर टुटेको तथा दै अक्षर अलिकति टुटेको ; मा.ग भावाभावपदैहीनं–क ।
८ दानादानपदैर्युक्तं–ग ।
९ न अक्षर टुटेको–क ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न[1] द्वैतं न च वाऽद्वैतं[2] द्वैताद्वैतोभयोज्झितम् ।
किन्तु सर्वोपमाहीनं यस्य संवित्तिलक्षणम् ॥ ८ ॥

त्यो परंब्रह्म तत्त्व शून्यातीत, निरामय, कालुष्यहीन, परं शुद्ध, निर्विकार, निराश्रय, निराधार, कैवल्यस्वरूप, सम्पूर्ण वाग्जालले वर्जित, सम्पूर्ण तत्त्वलाई आफूभित्र विलय गर्ने निस्तत्त्वस्वरूपले रहेको छ। उक्त परमात्मास्वरूप परं तत्त्व अज, शान्त, शाश्वत, कल्याणस्वरूप, भाव र अभावले रहित, भावनाले वर्जित, त्याग र ग्रहणले मुक्त, सबै ठाउँमा पुग्ने अर्थात् सर्वव्यापक, परमेश्वरस्वरूप, शक्तिभन्दा अतीत, गुणातीत, सम्पूर्ण द्वन्द्वले रहित, क्षर तथा अक्षरभावले कहिल्यै भावना गर्न नसकिने, द्वैत, अद्वैत वा द्वैताद्वैतभावले रहित, अनुपम, चैतन्यस्वरूप रहेको छ ॥ ४-८ ॥

चिन्तात् परतरं[3] वापि शब्दात् परतरं[4] सदा ।
तस्यावबोधात् परमा[5] शक्तिः शक्तिमतः परा ॥ ९ ॥
अकला च कलारूपा महोल्केव सुतेजसी[6] ।
उपमानस्वरूपेण[7] भूरिभानुरिवोदिता ॥ १० ॥
खकला खमयी[8] खस्था खेचरीष्वपि दुर्गमा ।
महाकाली[9] कलां[10] याता कलामृतमयी शुभा ॥ ११ ॥

मन र वाणीभन्दा परको विषय बनेको त्यस्तो शक्तिमान् परं ब्रह्मतत्त्वको क्षोभबाट अत्यन्त विशाल उल्कापिण्डझैँ तेजस्वरूप भएकी, कलाले युक्त एवं कलाले रहित भएकी, करोडौँ सूर्यको झैँ आभाले युक्त भएकी, परम शून्यस्वरूप भएकी, महाशून्य पदमा रहेकी, खेचरीहरूका लागि पनि जान्न ज्यादै कठिन रहेकी, मङ्गलस्वरूप भएकी, अमृतमय कलाले युक्त भएकी महाकाली प्रकट भइन् जो परं ब्रह्मस्वरूप शक्तिमान् महाकालकी अभिन्न पराशक्ति हुन् ॥ ९-११ ॥

---

१ न अक्षर टुटेको–क ।
२ वाद्वैतं–क ; नाद्वैतं–ग ।
३ वित्तात्परतरं–ग ।
४ श्रद्धात्परतरं–ग ।
५ र अक्षर टुटेको, मा अक्षर खुइलिएको–क ।
६ सुतेजसा–ग ।
७ उपमानस्वरूपेणे–ग ।
८ खभयी–ग ।
९ महाकालि–क ।
१० कला–क,ग ।

CC-0. Panini Kanya Maha Vidyalaya Collection.

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तस्याः कमलनोद्भूताः[१] काल्यंशास्तु[२] पदानुगाः[३] ।
संहारकरणे[४] यास्तु संस्थिता नायिका हर ॥ १२ ॥
तासां संहरणार्थं हि सैकेयं बहुधा गता ।
कालरूपान्तकरणी यत्र सा शान्तिमृच्छति[५] ॥ १३ ॥
एकैका सा स्वसामर्थ्यात् संहारहरणोद्यता ।
एकैका च परा देवी ज्ञेया ब्रह्मस्वरूपिणी[६] ॥ १४ ॥
एवं सा[७] द्वादशैर्भेदैः परमार्कस्वरूपिणी[८] ।
द्वादशाऽपि तदुत्पन्नाः शुद्धाः प्राकाश्यनिर्मलाः ॥ १५ ॥
सूर्यकोटिसहस्राभाश्चन्द्रायुतनिभोपमाः[९] ।
विग्रहास्ते[१०] सर्वदिक्काः शान्तास्तद्धर्ममागताः[११] ॥ १६ ॥
सर्वास्तमितभावा सा काली कालान्तकारिणी ।
स्वभावपदसंरूढा स्वप्रभावा कुलेश्वरी ॥ १७ ॥
महाकालीति संज्ञा सा पारम्पर्यक्रमोदिता ।
सदसद् व्यक्तसद्भावा परमानन्दनन्दिनी ॥ १८ ॥
बिन्दुस्था चाचला[१२] नित्या स्वेच्छानुरूपसंस्थिता[१३] ।
एकाकिनी चैकवीरा सुसूक्ष्मा चाव्यया परा ॥ १९ ॥
तासां नामानि भो[१४] देव द्वादशः श्रृणु भैरव ।
सर्वकारणनिर्मुक्ता इच्छानुरूपसंस्थिता[१५] ॥ २० ॥

---

१ कवलनोद्भूता–ग ।
२ काल्यंशम्तु–क ; काल्यशंत–ग ।
३ पदानुगा–ग ।
४ संहारकालने–ग ।
५ शान्तिमर्च्छति–क ।
६ ब्रह्मस्वरूपिणी पाठ मसी उडेकाले नबुझिने भएको छ–क ।
७ स्याद्–ग ।
८ द्वादशैर्भेदैर्परमाक्त(र्थ)स्वरूपिणी–ग ।
९ ..निभोपमा–ग ।
१० विग्रहान्ते–ग ।
११ शान्तास्तद्धर्ममागता–ग ।
१२ नाचला–क ।
१३ स्वेच्छारूपा तु संस्थिता–क,ग ।
१४ ये–ग ।
१५ इच्छारूपा तु संस्थिता–क ; इच्छा तुपा तु संस्थिता, पातुका माथि कोष्ठकमा (पा तु) लेखिएको–ग ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

खस्वरूपा खमध्यस्था खचक्रे च व्यवस्थिता ।
निरामया चाप्रमेया अनुच्चार्या गुणोज्झिता ॥ २१ ॥[१]
फट्कारान्ता[२] महाघोरा ग्रसन्ती भैरवेश्वरान् ।
रविमध्ये निरानन्दा चिन्मरीच्यन्तःभासिका ॥ २२ ॥
तस्या[३] द्वादश नामानि नामभेदेन[४] तच्छृणु[५] ।
मन्त्रोदया व्योमरूपा व्योमस्था व्योमवर्जिता ॥ २३ ॥
सर्वाः सर्वविनिर्मुक्ता विश्वेऽस्मिन् सृष्टिनाशनी ।
या कला विश्वविभवा सृष्ट्यर्थकरणक्षमा[६] ॥ २४ ॥
यदन्तः शमते[७] सा तु सृष्टिकालीति[८] सा स्मृता ।[९]
